चतुर्थः पाठः

# बालकः ध्रुवः

अयं बालकः ध्रुवः अस्ति | अस्य जनकः महाराजः उत्तानपादः आसीत् | तस्य धर्मपत्नी सुनीतिः रूपवती गुणवती पतिव्रता च नारी आसीत् | सर्वसुखसंपन्न: अपि राजा संततिविहीन: तदर्थं चिंतातुर: अभवत् | मतिमती सुनीतिः द्वितीयं विवाहं कर्तुं तम् अकथयत् |



तस्याः विशेषाग्रहेण राजा द्वितीयं विवाहं सुरुच्या सह अकरोत् | सुरुचिः रूपवती परं कुटिलहृदया आसीत् | विवाहात् परं तस्या: एकः पुत्रः अभवत् | राजा तस्य 'उत्तमः' इति नाम अकरोत् | कालान्तरे सुनीतिः अपि एकं पुत्रम् अजन्यत् | यस्य नाम ध्रुवः आसीत् |

एकदा नृपः उत्तमम् अंके कृत्वा अलालयत् | तदानीम् एव पंचवर्षीय: बालकः ध्रुवः तत्रागच्छत् | सः अपि नृपस्य अंके उपवेशनाय अवान्छत, किन्तु नृपः तं नोपावेशयत् | तदा तत्रोप्विष्टा विमाता सुरुचिः ध्रुवम् अवदत् - "त्वम् तपोबलेन यदा मम कुक्षौ जन्म ग्रहीष्यसि तदा राजांके उपवेशनयोग्यः भविष्यसि" इति | तया अपमानितः ध्रुवः तत् सर्वं स्वमातरम् अकथयत् अपृच्छत् च - "राजसिंहासनात् अपि उच्चस्थानं किम् ? अहं तदेव प्राप्तुं प्रयतिष्ये |" चकिता माता अब्रवीत् - "भगवान् एव तत्स्थानं दातुं समर्थः, त्वं तमेव भज |" मातु: आज्ञया ध्रुवः वनमगच्छत् | तत्र मार्गे नारदः तम् अमिलत् | ततः नारदस्योपदेशेन सः स्वलक्ष्यप्राप्तौ सफलः अभवत् | अद्यापि आकाशे ध्रुवः 'ध्रुवतारा' इति नाम्ना उच्चै: स्थितः अस्ति| धन्योऽयं देशः, यत्र ईदृशः बालकः अभवत् |

शब्दार्थ

**जनकः** = पिता | **संततिविहीनः** = संतानहीन | **मतिमती** = बुद्धिमती | **कुटिलहृदया** = कपटपूर्ण ह्रदय वाली | **परं** = बाद में | **कालान्तरे** = कुछ समय बाद | **अंके कृत्वा** = गोद में रखकर | **अलालयत्** = खिला रहे थे | **तदानीम्** = उसी समय | **उपावेशयत्** = बैठाया | **विमाता** = सौतेली माता | **कुक्षौ** = कोख में | **प्रयतिष्ये** = प्रयास करूंगा | **ईदृशः** = ऐसा |

अभ्यास

1. उच्चारण करें -

पतिव्रता कुक्षौ लक्ष्यप्राप्तौ नोपावेशयत् नारदस्योपदेशेन अब्रवीत् धन्योऽयं ईदृशः

2. एक पद मंे उत्तर दें-

(क) ध्रुवस्य जनकः कः आसीत् ?

(ख) मातुः आज्ञया ध्रुवः किम् अकरोत् ?

(ग) कस्य उपदेशेन ध्रुवः स्वलक्ष्यं प्राप्तवान् ?

(घ) धुवं्र मार्गकः अमिलत् ?

3. किसने कहा लिखिए-

(क) राजसिंहासनात् अपि उच्चस्थानं किम् ?

(ख) भगवान् एव तत्स्थानं दातुं समर्थः।

(ग) यदा मम कुक्षौ जन्म ग्रहीष्यसि तदा उपवेशनयोग्यः भविष्यसि।

4. अधोलिखित पदों में उपसर्ग छाँटिए-

उपवेशनाय   अपमानितः   उपदेशेन   प्राप्तुम्

5. विशेषण-विशेष्य का सही मिलान करें-

| ‘क’ | ‘ख’ |
|---|---|
| बालकः | उत्तानपादः |
| महाराजः | सुरुचिः |
| मतिमती | ध्रुवः |
| कुटिलहृदया | सुनीतिः |

6. विलोम-पदों का मिलान करें-

| ‘क’ | ‘ख’ |
|---|---|
| उच्चैः | पातालम् |
| आकाशः | नीच्चैः |
| सरला | अपमानितः |
| सम्मानितः | कुटिला |

7. अधोलिखित वाक्यों की सहायता से सही घटना क्रम बनाएँ-

(क) एकः उत्तानपाद-नामकः राजा आसीत्।

(ख) मातुः आज्ञया ध्रुवः वनम् अगच्छत्।

(ग) एकदा ध्रुवः स्व-विमात्रा अपमानितो जातः।

(घ) नारदस्य उपदेशेन सः स्वलक्ष्यप्राप्तौ सफलः अभवत्।

(ङ) तया अपमानितः ध्रुवः तत्सर्वं स्वमातरम् अकथयत्।

(च) तस्य सुरुचिः सुनीतिः इति द्वे स्त्रियौ स्तः।

(छ) सुनीतेः पुत्रः ध्रुवः आसीत्।